National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 149-151
© 2026 NJHSR
www.sanskritarticle.com

**श्रीमती कृष्णप्रिया हातिः**
शोधच्छात्रा,
रायगञ्ज-विश्वविद्यालयः

**Correspondence:**
**श्रीमती कृष्णप्रिया हातिः**
शोधच्छात्रा,
रायगञ्ज-विश्वविद्यालयः

# मार्कण्डेयपुराणे कालनिरूपणम्

**श्रीमती कृष्णप्रिया हातिः**

**सारसंक्षेपः (Abstract) :**

अष्टादशमहापुराणेषु मार्कण्डेयपुराणम् अतीव प्राचीनम्, प्रामाणिकम्, विविध-शास्त्र-समन्वितं च महापुराणं अस्मिन् महापुराणे कालस्य स्वरूपम्, तस्य सूक्ष्मातिसूक्ष्मः क्रमिकविकासः, व्यावहारिक-विभागाः, सुदीर्घः महाकालनिर्णयः ब्रह्माण्डीय-कालावधिश्च वैज्ञानिक-दार्शनिक-दृष्ट्या प्रतिपादितम् अस्ति। विशेषतः पुराणस्य ४६ तः ४८ अध्यायेषु अस्य गम्भीरं निरूपणं प्राप्यते। प्रस्तुत-शोधपत्रे मार्कण्डेयपुराणोक्तां कालगणनाम्, भारतीयकालविज्ञानस्य विविध-सोपानानि, तस्य च आधुनिक-मानव-समाजे व्यावहारिक-पर्यावरणीय-स्वास्थ्य-मनोवैज्ञानिक-दृष्ट्या उपादेयताम् अधिकृत्य समीक्षात्मकं विश्लेषणात्मकं च विस्तृतम् अध्ययनं विहितम्।

## १. प्रस्तावना (Introduction)

भारतीय-दार्शनिक-परम्परायां कालः न केवलम् भौतिकं मापकसाधनं वा घटिकायाः सुचि-सञ्चालनं अस्ति, अपितु अयं नित्यः, अनादिः, अनन्तः, जगदुत्पत्ति-स्थिति-लयानां मुख्यः आधारभूतः हेतुः अस्ति। मार्कण्डेयपुराणे कालस्य स्वरूपं सूक्ष्मतातः आरभ्य स्थूलतां प्रति एकां सुव्यवस्थितां वैज्ञानिकीं च सरणिं प्रस्तौति। यत्र आधुनिक-भौतिकविज्ञाने समयस्य सूक्ष्मतमः अंशः 'सेकण्ड' इति मन्यते, तत्र पौराणिक-परम्परायां परमाणोः सकाशात् आरभ्य 'परार्ध' पर्यन्तं सुसूक्ष्मा स्थूला च कालगणना प्रदर्शिता। एषा कालगणना न केवलं ब्रह्माण्डस्य उत्पत्ति-प्रलय-चक्रं निर्धारयति, अपितु मानवस्य व्यावहारिक-सांस्कृतिक-पर्यावरणीय-जीवनेन सह साक्षात् सम्बद्धा अस्ति।

## २. भारतीयकालविज्ञानानुसारेण कालस्य सूक्ष्म-स्थूल-भेदाः

मार्कण्डेयपुराणे कालस्य निरूपणं मुख्यतः द्वेधा विभक्तुं शक्यते— **सूक्ष्मा कालगणना** तथा च **स्थूला कालगणना**।

### २.१. सूक्ष्मा कालगणना (Micro Time Calculations)

पुराणानुसारं कालस्य सूक्ष्मतमः निरवयवः च अंशः 'परमाणुः' अस्ति। अस्मात् सूक्ष्मातिसूक्ष्मात् अंशात् आरभ्य व्यावहारिक-दिन-रात्र्योः निर्माणं कथं भवति, तत् अधोदत्तायां सारण्यां सुस्पष्टं निरूपितम्—

| कालस्य एककम् (Unit) | परिमाणम् / सम्बन्धः (Equivalence) |
|---|---|
| **अणुः** | २ परमाणू मिलित्वा |
| **त्रसरेणुः** | ३ अणवः (६ परमाणवः) |
| **त्रुटिः** | ३ त्रसरेणवः |
| **वेधः** | १०० त्रुटयः |
| **लवः** | ३ वेधाः |
| **निमेषः** | ३ लवाः (अक्षिपातमात्रः कालः) |
| **काष्ठा** | १५ निमेषाः |
| **कला** | ३० काष्ठाः |
| **मुहूर्तः** | ३० कलाः (प्रायः ४८ मिनट्-परिमितम्) |
| **अहोरात्रम्** | ३० मुहूर्तानि (मानवस्य एकं पूर्णं दिनं रात्रिः च) |

**२.२.स्थूलकालगणना तस्याः विभागाश्च (Macro Time Divisions)**

व्यावहारिकजीवने सृष्टि-सञ्चालनाय च स्थूलकालस्य विभागाः अतीव महत्त्वपूर्णाः सन्तिः।

1. **अहोरात्रम् -** ३० मुहूर्तानि मिलित्वा एकं पूर्णम् 'अहोरात्रं' भवति, यत् मनुष्यस्य दैनन्दिन-जीवनस्य मुख्यः आधारः अस्ति।

2. **पक्षः -** पञ्चदश (१५) अहोरात्राणि मिलित्वा एकः पक्षो भवति। अस्य द्वौ भागौ स्तः—

o **शुक्लपक्षः -** प्रतिपदः पूर्णिमापर्यन्तः, यत्र चन्द्रस्य कलाः वर्धन्ते।

o **कृष्णपक्षः -** प्रतिपदः अमावस्यापर्यन्तः, यत्र चन्द्रस्य कलाः क्षीयन्ते।

3. **मासः -** द्वौ पक्षौ (शुक्ल-कृष्णपक्षौ) मिलित्वा एकः 'मासः' भवति। पौराणिकदृष्ट्या मानुषमासः पितॄणाम् एकम् अहोरात्रं भवति (कृष्णपक्षः तेषां दिनं तथा शुक्लपक्षः रात्रिः)।

4. **ऋतुः -** द्वौ मासौ मिलित्वा एकः 'ऋतुः' भवति। एकस्मिन् वर्षे षट् ऋतवः भवन्ति— (१) वसन्त-ऋतुः, (२) ग्रीष्म-ऋतुः, (३) वर्षा-ऋतुः, (४) शरद्-ऋतुः, (५) हेमन्त-ऋतुः, (६) शिशिर-ऋतुः।

5. **अयनम् -** त्रयः ऋतवः (६ मासाः) मिलित्वा एकम् 'अयनं' भवति। एते द्वे स्त—

o **उत्तरायणम् :** मकरसङ्क्रान्तितः कर्कटसङ्क्रान्तिपर्यन्तम्, यत्र सूर्यः उत्तरदिशं प्रति गच्छति।

o **दक्षिणायनम् :** कर्कटसङ्क्रान्तितः मकरसङ्क्रान्तिपर्यन्तम्, यत्र सूर्यो दक्षिणदिशं प्रति गच्छति।

6. **वर्षम् / संवत्सरः -** द्वे अयने मिलित्वा एकं 'मानुषवर्षम्' (३६५ दिनानि) भवति। एतत् मनुष्याणाम् एकं वर्षं देवतानाम् एकम् अहोरात्रम् (उत्तरायणं दिनं, दक्षिणायनं च रात्रिः) भवति।

**३. महाकालनिर्णयः - युग-मन्वन्तर-कल्प-गणना**

दिव्यवर्षाणाम् आधारेण चतुर्युगानाम् ब्रह्माण्डस्य च कालमानं सुदीर्घ-परिमाणे निर्धारितम् अस्ति।

१ चतुर्युगम् (४३,२०,००० मानुषवर्षाणि) ⟶ ७१ चतुर्युगानि = १ मन्वन्तरम् ⟶ १४ मन्वन्तराणि = १ कल्पः (ब्रह्मणः १ दिनम्)

1. **कृतयुगम् (सत्ययुगम्) :** ४,००० दिव्यवर्षाणि (४०० वर्षे सन्ध्या + ४०० वर्षे सन्ध्यांशः = ४,८०० दिव्यवर्षाणि)।

2. **त्रेतायुगम् :** ३,००० दिव्यवर्षाणि (३०० सन्ध्या + ३०० सन्ध्यांशः = ३,६०० दिव्यवर्षाणि)।

3. **द्वापरयुगम् :** २,००० दिव्यवर्षाणि (२०० सन्ध्या + २०० सन्ध्यांशः = २,४०० दिव्यवर्षाणि)।

4. **कलियुगम् :** १,००० दिव्यवर्षाणि (१०० सन्ध्या + १०० सन्ध्यांशः = १,२०० दिव्यवर्षाणि)।

5. **महायुगम् (चतुर्युगम्) :** एतानि चत्वारि युगानि मिलित्वा १२,००० दिव्यवर्षाणि अर्थात् **४३,२०,००० मानुषवर्षाणि** भवन्ति।

6. **मन्वन्तरम् :** एकाधिकसप्ततिः (७१) महायुगानां कालः एकं 'मन्वन्तरं' भवति।

7. **कल्पः :** चतुर्दशानां (१४) मन्वन्तराणां कालः एकः 'कल्पः' भवति। अयं कल्पः एव **ब्रह्मणः एकं दिनम्** इति कथ्यते। तावती एव दीर्घा ब्रह्मणः रात्रिरपि भवति।

ब्रह्मणः सम्पूर्णम् आयुः १०० वर्षाणि भवति, यत् 'परम्' इति उच्यते, अस्य च अर्धभागः 'परार्धः' इति कथ्यते। चतुर्मुखब्रह्मणः आयुः, तस्य मानम्, सूक्ष्मात् स्थूलं प्रति कालगणनायाः क्रमिकविकासश्च मार्कण्डेयपुराणे अधोलिखितैः श्लोकैः उपवर्णिताः सन्ति—

“तस्य वर्षशतं त्वेकं परमायुर्महात्मनः।

**ब्राह्मयेणैव हि मानेन तस्य संख्यां निबोध मे ।।**
**निमेषैर्दशभिः काष्ठा तथा पञ्चभिरुच्यते ।**
**कलास्त्रिंशच्च वै काष्ठा मुहूर्तं त्रिंशदेव ताः।।**
**अहोरात्रं मुहूर्तानां नृणां त्रिंशत्तु वै स्मृतम्।**
**अहोरात्रैश्च त्रिंशद्भिः पक्षौ द्वौ मास उच्यते।।**
**तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे।**
**तद्देवानामहोरात्रं दिनं तत्रोत्तरायणम्।।**
**दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञिताम्।**
**चतुर्युगं द्वादशभिस्तद्विभागं शृणुष्व मे।।**
**चत्वारि तु सहस्राणि वर्षाणां कृतमुच्यते।।”**[1]

**४. भारतीयकालविज्ञानस्य बहुविधं प्राधान्यम् आवश्यकता च**

मार्कण्डेयपुराणोक्तं कालविज्ञानं न केवलम् सैद्धान्तिकं गणितम्, अपितु अस्य मानवीये जीवने विविधाः उपयोगाः सन्ति।

**४.१. वैज्ञानिकता सूक्ष्मातिसूक्ष्मगणना च**

यत्र आधुनिक-विज्ञाने समयस्य सूक्ष्मतमः खण्डः 'सेकण्ड' इति मन्यते, तत्र भारतीयकालविज्ञाने परमाणुः, त्रुटिः, लवः, निमेषः इत्यादयः सूक्ष्माः भागाः कृतास्सन्ति। एतादृशी अतीव सूक्ष्मा कालगणना संसारस्य अन्यस्मिन् कस्मिन्नपि प्राचीने साहित्ये न प्राप्यते।

**४.२. कृषि-पारिस्थितिक-पर्यावरणसम्बन्धः**

भारतदेशः कृषिप्रधानः अस्ति। कस्यां तिथौ, कस्मिन् नक्षत्रे वा किं बीजं वप्तव्यम्, कदा वृष्टिः भविष्यति—इत्येतत् सर्वं सौर-चान्द्र-गणिताधारित पञ्चाङ्गेन ज्ञायते। अतः कृषकाणां कृते पर्यावरण-सन्तुलनाय च अस्य कालविज्ञानस्य महती आवश्यकता वर्तते।

**४.३. धार्मिक-सांस्कृतिक-निरन्तरता**

भारते सर्वे उत्सवाः, यथा— दीपावली, होलिकोत्सवः, महाशिवरात्रिः, नवरात्रं च चान्द्रमासस्य तिथिभ्यः निर्धार्यन्ते। यदि

एतत् कालविज्ञानं न स्यात्, तर्हि अस्माकं सांस्कृतिक-सन्ततिः निरन्तरता च नष्टा भवेत्।

**४.४. संस्काराय मुहूर्तशोधनाय च**

मानवजीवने गर्भाधानतः अन्त्येष्टिपर्यन्तं षोडश संस्काराः भवन्ति। विवाह-गृहप्रवेशादि-शुभकार्याणां कृते अनुकूलकालस्य चयनं कालविज्ञानस्य साहाय्येन एव सम्भवति, येन कार्येषु सकारात्मकता वर्धते।

**४.५. शारीरिक-मानसिक-स्वास्थ्यरक्षणम्**

अस्माकं शरीरे चन्द्रस्य सूर्यस्य च प्रत्यक्षः प्रभावो भवति। पूर्णिमा-अमावस्या-सङ्क्रान्तिषु समुद्रस्य तरङ्गेष्विव मानवशरीरे मनसि च परिवर्तनानि भवन्ति। तदनुसारं कीदृशः आहारविहारो भवेत् इत्येतदर्थं कालविज्ञानम् अतीव आवश्यकम् अस्ति।

**४.६. मनोवैज्ञानिकः आशावादः**

'महाकालनिर्णये' उक्तं यत् कालः चक्रवत् परिवर्तते। व्यवस्थेयं मनुष्यस्य मनसि महन्तम् आशावादं जनयति यत् दुःखदः कालः न शाश्वतः, अस्य अन्ते पुनः सत्ययुगस्य/सुखस्य आगमनं निश्चितम् अस्ति।

**५. निष्कर्षः (Conclusion)**

एतत् वक्तुं शक्यते यत् मार्कण्डेयपुराणे वर्णिता कालगणना न केवलं पौराणिकी कल्पना, अपितु खगोलशास्त्र-भौतिकशास्त्र-पर्यावरण-शास्त्र-जीवविज्ञानैः सह सम्बद्धा एका सुदृढा पूर्णा च वैज्ञानिकी पद्धतिः अस्ति। सुसूक्ष्मात् परमाणोः आरभ्य विशाल-ब्रह्माण्डस्य आयुः यावत् व्याप्ता इयं कालगणना आधुनिक-मानव-समाजे प्रकृतिसन्तुलनाय, मानसिक-शान्तये, सांस्कृतिक-संरक्षणाय, जीवनशैली-संशोधनाय च सम्यग् मार्गदर्शनं करोति।

**कूटशब्दाः (Keywords) -** मार्कण्डेयपुराणम्, कालनिरूपणम्, भारतीयकालविज्ञानम्, महाकालनिर्णयः, सूक्ष्मा कालगणना, परमाणु-त्रुटी-निमेषाः, स्थूलकालगणना, पक्ष-मास-ऋतवः, अयनम् (उत्तरायण-दक्षिणायने), चतुर्युगम्/महायुगम्, मन्वन्तरम्, कल्पः (ब्रह्मणः दिनम्), दिव्यवर्षाणि, वैज्ञानिकता, कृषि-पारिस्थितिकी, सांस्कृतिक-निरन्तरता, मनोवैज्ञानिक-आशावादः।

**सन्दर्भ ग्रन्थः**

[1] मार्कण्डेयपुराणे- 42.22-27